उन्मादनश्च कामस्य वाणाः पञ्च प्रकीर्त्तिताः ॥"
पञ्चपुष्पवाणा यथा,—
"अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चवाणस्य सायकाः ॥")
पञ्चवाणविशिष्टे त्रि ॥
पञ्चशरः, पुं, ( पञ्च शरा यस्य सः । ) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ अस्य पञ्च शराश्च यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्याये ।
"सम्मोहनं समुद्देगबीजं स्तम्भनकारणम् ।
उन्मत्तबीजं ज्वलनं शश्वच्चेतनहारकम् ॥"
अपि च ।
"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च वाणाः प्रकीर्त्तिताः ॥"
पञ्च इन्द्रियार्थाः शरा अस्येत्यन्ये । इति भरतः ॥ ( यथा, कुमारे । ७ । ६२ ।
"शापावसाने प्रतिपन्नमूर्त्ते-
र्ययाचिरे पञ्चशरस्य सेवाम् ॥" )
पञ्चशस्यं, क्ली, ( पञ्चानां शस्यानां समाहारः । ) शस्यपञ्चकम् । तत्तु धान्यमुद्गतिलयवश्वेतसर्षपरूपम् । सर्षपस्थाने माषोऽपि । इति दुर्गोत्सवपद्धतिः ॥
पञ्चशाखः, पुं, ( पञ्च शाखा इवाङ्गुलयो यस्य । ) हस्तः । इत्यमरः । २ । ६ । ८१ ॥ पञ्चानां शाखानां समाहारे क्ली । पञ्चशाखाविशिष्टे त्रि ॥
पञ्चशिखः, पुं, ( पञ्चा विस्तीर्णा शिखा केशरादिर्यस्य । ) सिंहः । इति हेमचन्द्रः ॥ धर्म्मस्य हिंसाभार्य्यायां जातो मुनिविशेषः । यथा,—
"धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्त्रचतुष्टयम् ।
सम्प्राप्तं मुनिशार्द्दूल ! योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः ।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम् ॥"
इति वामने ५० अध्यायः ॥
( अस्य अन्यप्रकारोत्पत्तिर्नामनिरुक्तिश्च उक्ता महाभारते । १२ । २१८ । ६—१६ ।
"तत्र पञ्चशिखो नाम कापिलेयो महामुनिः ।
परिधावन् महीं कृत्स्नां जगाम मिथिलामथ ॥
सर्व्वसंन्यासधर्म्माणां तत्त्वज्ञानविनिश्चये ।
सुपर्य्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः ॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु ।
शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम् ॥
यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् ।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम् ॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् ।
पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम् ॥
यत्र चासीनमागम्य कापिलं मण्डलं महत् ।
पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ॥
इष्टसत्रेण संसृष्टो भूयश्च तपसासुरिः ।
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः ॥
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ।
आसुरिर्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् ॥
तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः ॥
ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी ।
तस्याः पुत्त्रत्वमागम्य स्त्रियाः स पिबति स्तनौ ॥
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम् ।
एतत्ते भगवानाह कापिलेयस्य सम्भवम् ॥
तस्य तत् कापिलेयत्वं सर्व्ववित्त्वमनुत्तमम् ॥
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमम् ।
उपेत्य शतमाचार्य्यान्मोहयामास हेतुभिः ॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् ।
उत्सृज्य शतमाचार्य्यान् पृष्ठतोऽनुजगाम तम् ॥
पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः ॥"
गायत्त्रीस्वरूपायां शक्तौ स्त्री । यथा, देवीभागवते । १२ । ६ । १०५ ।
"मानप्रिया पञ्चशिखा पन्नगोपरिशायिनी ॥" )
पञ्चशूरणः, पुं, ( पञ्च शूरणा यत्र । ) पञ्चप्रकारशूरणः । तद्यथा । अत्यम्लपर्णी काण्डीरः मालाकन्दः शूरणः श्वेतशूरणश्च । तथाहि ।
"अत्यम्लपर्णीकाण्डीरमालाकन्दद्विशूरणैः ।
कथ्यते भवति योगोऽयं पञ्चशूरणसंज्ञकः ॥"
इति राजनिर्घण्टः ॥
पञ्चशैरीषकं, क्ली, ( शिरीषपञ्चस्य इदम् शैरीषकम् । पञ्चसंख्यकं शैरीषकम् । ) शिरीषवृक्षस्य कुसुममूलफलपत्त्रत्वचः । इति राजनिर्घण्टः ॥
पञ्चषाः, त्रि, पञ्च वा षट् वा परिमाणं येषां ते । बहुवचनान्तोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ॥
पञ्चसिद्धौषधिः, पुं, (पञ्च सिद्धा औषधयो यस्मिन् ।) पञ्चप्रकारौषधिविशेषः । यथा,—
"तैलकन्दसुधाकन्दक्रोडकन्दरुदन्तिकाः ।
सर्पनेत्रयुताः पञ्चसिद्धौषधिकसंज्ञकाः ॥"
इति राजनिर्घण्टः ॥
पञ्चसुगन्धकं, क्ली, (पञ्च सुगन्धा यत्र । ततः कप् ।) पञ्चप्रकारसुगन्धिद्रव्यम् । यथा,—
"कुसुमानि लवङ्गस्य तथा कक्कोलकाक्षयोः ।
जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम् ॥"
इति शब्दचन्द्रिका ॥
अपि च ।
"कर्पूरकक्कोललवङ्गपुष्प-
गुवाकजातीफलपञ्चकेन ।
समांशभागेन च योजितेन
मनोहरं पञ्चसुगन्धकं स्यात् ॥"
इति राजनिर्घण्टः ॥
पञ्चसूना, स्त्री, ( पञ्चगुणिता सूना प्राणिवधस्थानम् ।) पञ्चप्रकारप्राणिवधस्थानम् । यथा,—
"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥"
इति शुद्धितत्त्वम् ॥
तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति तस्य प्रायश्चित्तं वैश्वदेवः । यथा,—
"लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवन्तु कुर्व्वीत पञ्चसूनापनुत्तये ॥"
इति आह्निकतत्त्वधृतशातातपवचनम् ॥
अग्नौ पचनकालोत्पन्नपञ्चसूनादिजन्यपापस्य दानादिनाशकत्वं यथा,—
"दशाहाच्च परं सम्यक् विप्रोऽधीयीत धर्म्मवित् ।
दानञ्च विधिना देयमशुभात्तारकं हि तत् ॥"
इति शुद्धितत्त्वधृतसम्वर्त्तवचनम् ॥
पञ्चस्वरा, स्त्री, ( पञ्च स्वरा यत्र । ) प्रजापतिदासवैद्यकृतशिशुरिष्टमातृरिष्टपितृरिष्टस्त्रीपुंस-पुंसकज्ञानसुखदुःखरिष्टच्छेदादियोगद्भुतज्ञाननिर्णय इति सप्ताध्यायात्मकज्योतिर्ग्रन्थविशेषः यथा । तत्रैव ।
"पञ्चस्वराभिधानञ्च यथं निदानसम्मतम् ।
किञ्चिदुद्दिशगम्यञ्च स्वल्पं वक्ष्यामि शास्त्रतम् ॥"
पञ्चस्वरोदयः, पुं, (पञ्चानां स्वराणामुदयो यत्र ।) ज्योतिःशास्त्रविशेषः । यथा,—
"कालं वक्ष्यामि संसिद्धौ यत्र पञ्चस्वरोदयात् ।
राजा माता उदासा च पीडा मृत्युस्तथैव च ॥
आ इ ऊ ए ओ स्वराश्च लिखेत् पञ्चाङ्किकोष्ठके ।
ऊर्द्धतिर्य्यग्गतैरेखैः षड्वह्निक्रममागतैः ॥
तिथौ एकाधिकोष्ठेषु जयो राजाथ मातया ।
उदासा पीडा मृत्युश्च कुजः सोमसुतः क्रमात् ॥
गुरुशुक्रशनैश्चररविचन्द्रा यथोदितम् ।
रेवत्यादिशिवान्ताश्च नक्षत्राश्च प्रथमाः कलाः ॥
पञ्चपञ्चाञ्च भानि पैत्राद्य उदयस्तथा ।
द्वादशाद्या द्वयो मासा नाम्न आद्यक्षरं तथा ॥
कला लिखेच्च या तिष्ठेत् पञ्चमस्तस्य वै स्मृतिः ।
लका तिथिस्तथा वारनक्षत्रं मासमेव च ॥
नामोदयस्य पूर्व्वञ्च तथा भवति नान्यथा ॥"
इति गरुडपुराणम् ॥
पञ्चाग्नि, स्त्री, पञ्चानामग्नीनां समाहारः । अस्य विवरणं पञ्चातपशब्दे द्रष्टव्यम् ॥ शरीरस्थपञ्चाग्नयो यथा,—
"उदरे गार्हपत्याग्निर्मध्यदेशे तु दक्षिणः ।
आस्ये आहवनोऽग्निश्च सभ्यः पर्व्वा च मूर्द्धनि ।
यः पञ्चाग्नीनिमान् वेद आहिताग्निः स उच्यते ॥"
इति गरुडपुराणम् ॥
( पञ्चाग्नयो यस्य । इति विग्रहे वाच्यलिङ्गत्वम् । यथा मनुः । ३ । १८५ ।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥")
पञ्चाङ्गं, क्ली, पञ्चानां अङ्गानां एकवृक्षस्य त्वक्पत्त्रपुष्पमूलफलानां समाहारः । यथा,—
"त्वक्पत्त्रकुसुमं मूलं फलमेकस्य शाखिनः ।
एकत्र मिलितञ्चैतत् पञ्चाङ्गमिति संज्ञितम् ॥"
इति राजनिर्घण्टः ॥
पुरश्चरणविशेषः । यथा,—
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥"
इति तन्त्रसारः ॥
वारतिथिनक्षत्रयोगकरणात्मकपञ्जिका । यथा,